# शिक्षाशास्त्री (बी.एड्.)

## एन.टी.ए. द्वारा आयोजितायै सीयूईटी-पीजी 2022

## प्रवेशपरीक्षायै (PGQP09)

## निर्देशिका



# केन्द्रीयसंस्कृतविश्वविद्यालयः


शिक्षामन्त्रालय-भारतसर्वकाराधीनः (संसदः अधिनियमेन संस्थापितः)

56-57 इन्स्टीट्यूशनल एरिया, (डी-ब्लाक) जनकपुरी, नवदेहली – 110058

फोन न. 011-28521258, जालपुटम् - www.sanskrit.nic.in वै-पत्रम् – exams@csu.co.in

# विषयानुक्रमणिका


| क्र.सं. | विषयाः | पृ.सं. |
|---|---|---|
| 1. | केन्द्रीयसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः | 3 |
| 2. | शिक्षाशास्त्रिकक्षायां (बी.एड्.) प्रवेशार्थं योग्यता | 3 |
| 3. | शिक्षाशास्त्रिपाठ्यक्रमे स्थानसंख्या | 4 |
| 4. | आरक्षणम् | 5 |
| 5. | आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः | 5 |
| 6. | विश्वविद्यालयस्य परिसरेषु अध्ययनधाराक्रमेण आरक्षितस्थानानि | 6 |
| 7. | शिक्षाशास्त्रि (बी.एड्.) प्रवेशपरीक्षायै (2022) निर्देशाः | 7 |
| 8. | परीक्षाकेन्द्राणि | 8 |
| 9. | अत्यावश्यकसूचनाः | 8 |
| 10. | विश्वविद्यालयपरिसरेषु अध्ययनार्थं सद्यस्क-आवेदनाय निर्देशाः | 8 |
| 11. | सद्यस्क-आवेदनात् प्राक् ध्यातव्यतथ्यानि | 9 |
| 12. | परीक्षावधिः परीक्षासम्बद्धसूचनाः च | 9 |
| 13. | प्रश्नपत्ररूपरेखा | 10 |
| 14 | मूल्याङ्कनविधिः | 10 |
| 15. | परीक्षापरिणामसम्बद्धाः विशेषसूचनाः | 10 |
| 16. | शिक्षाशास्त्रिप्रवेशपरीक्षायाः (2022) पाठ्यक्रमः | 11 |
| 17. | प्रवेशपरीक्षायाः प्रश्नानाम् उदाहरणानि | 11 |

## शिक्षाशास्त्री (बी.एड्.) प्रवेशपरीक्षा – 2022

**1. केन्द्रीयसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः**

सर्वकारस्य (1956) संस्कृतायोगकृतानुशंसाधारेण भारतसर्वकारद्वारा 1970 इत्यस्मिन् वर्षे राष्ट्रियसंस्कृत-संस्थानस्य स्थापना अभवत्। अस्य मुख्योद्देश्यम् आभारतं संस्कृतशिक्षा, शिक्षणम्, अनुसन्धानसम्वर्धनम्, प्रचारः संरक्षणञ्च वर्तते। इदं पूर्णतः भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयद्वारा (साम्प्रतं शिक्षामन्त्रालयेन) वित्तपोषितम् आसीत्। पारम्परिकसंस्कृतशिक्षायाः प्रचारप्रसारक्षेत्रे अस्यावदानं निरीक्ष्य राष्ट्रियसंस्कृतसंस्थानं मई-मासस्य सप्तमदिनाङ्के 2002 इत्यस्मिन् वर्षे मानितविश्वविद्यालयरूपेण समुद्घोषितम्। सम्प्रति राष्ट्रियसंस्कृतसंस्थानं केन्द्रीयसंस्कृतविश्वविद्यालय-अधिनियमः 2020 (इत्यस्य संख्या 5) इत्यस्य अन्तर्गतः संसदा केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली इति रूपेण पारितः। महामहिमराष्ट्रपतिमहोदयानामनुमोदनोपरान्तं 30 अप्रैल् 2020 इत्यतः केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली इति रूपेण समारब्धः।

विश्वविद्यालयोऽयम् अखिलभारतीयविश्वविद्यालयसङ्घस्य सदस्योऽस्ति तथा च राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा (NAAC) द्वारा 'ए' इति श्रेण्यां प्रत्यायितोऽस्ति । देशस्य विभिन्नभागस्थेषु परिसरेषु प्राक्शास्त्री इत्यारभ्य आचार्य/विद्यावारिधिः यावत् अध्ययनं भवति। अस्य दशपरिसरेषु द्विवर्षीयशिक्षाशास्त्रिपाठ्यक्रमोऽपि सञ्चाल्यते। यश्च राष्ट्रियशिक्षकशिक्षापरिषदा मान्यता सम्प्राप्य विद्यते। शिक्षाशास्त्रिकक्षायां प्रवेशार्थम् अखिलभारतीयस्तरे शिक्षाशास्त्रिप्रवेशपरीक्षा समायोज्यते। विश्वविद्यालयद्वारा द्विवर्षीयः शिक्षाचार्यपाठ्यक्रमोऽपि कतिपयपरिसरेषु सञ्चाल्यते। अत्रापि प्रवेशः अखिलभारतीयस्तरे सञ्चालितशिक्षाचार्यप्रवेशपरीक्षाद्वारा भवति ।

अस्मात् शैक्षिकसत्रात् (2022-23) शिक्षाशास्त्रिकक्षायां प्रवेशार्थम् अखिलभारतीयस्तरे भारतसर्वकारेण सञ्चालितस्य **नेशनल टेस्टिंग एजेन्सी (NTA)** इत्यस्य माध्यमेन शिक्षाशास्त्रिप्रवेशपरीक्षा आयोज्यमाना विद्यते। **शिक्षाशास्त्रिप्रवेशपरीक्षायाः प्रश्नपत्रकूटाङ्कः एन.टी.ए.द्वारा PGQP09 निर्धारितो विद्यते।** विश्वविद्यालयेन द्विवर्षीयः शिक्षाचार्यपाठ्यक्रमोऽपि कतिपयपरिसरेषु सञ्चाल्यते। अत्रापि प्रवेशार्थम् अखिलभारतीयस्तरे **नेशनल टेस्टिंग एजेन्सी (NTA)** इत्यस्यैव माध्यमेन शिक्षाचार्यप्रवेशपरीक्षा आयोज्यमाना अस्ति ।

**2. सीयूईटी-पीजी 2022 अन्तर्गतायाः शिक्षाशास्त्रिप्रवेशपरीक्षायाः कृते अर्हताः**

**(अ) अर्हताः**

2. **शिक्षाशास्त्रिप्रवेशपरीक्षायाः कृते न्यूनतमार्हताः**

- शिक्षाशास्त्रिप्रवेशपरीक्षायां प्रवेशार्थम् अभ्यर्थी शास्त्रिपरीक्षायाम् अथवा वर्षत्रयेऽपि संस्कृतमुख्यविषयक-(बी.ए.) परीक्षायाम् / आचार्यः /एम.ए. (संस्कृते) इति परीक्षायां तत्समकक्षपरीक्षायां वा न्यूनातिन्यूनैः पञ्चाशत् (50%) प्रतिशताङ्कैः उत्तीर्णः स्यात्।
- अर्हतापरीक्षायां प्रविष्टाः छात्राः अपि आवेदनं कर्तुं शक्नुवन्ति।

- केन्द्रीयसर्वकारस्य नियमानुसारम् अनुसूचितजातिजनजातीयानाम्, अन्याप्रगतजातीयानाम्, अन्यथा सक्षमाणां च कृते शास्त्री/बी.ए.(संस्कृतेन)/आचार्यः/एम.ए. (संस्कृतेन) इति परीक्षायाम् अङ्कानां पञ्चचत्वारिंशत् प्रतिशतम् (45%) अर्हताऽस्ति। अन्याः व्यवस्थाः सामान्याः तिष्ठन्ति।

परीक्षाफलघोषणे विलम्बे सति प्रवेशकाले साक्षात् अथवा गोपनीयपरीक्षोत्तीर्णताप्रमाणमवश्यमेव समर्पणीयं स्यात् अन्यथा प्रवेशः निरस्यते।

**चयनविधिः**

भारतसर्वकारस्य निर्देशानाम् अनुरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमेषु अध्ययनार्थं एन.टी.ए.द्वारा प्रश्नपत्रकूटाङ्केन PGQP09 सह **सीयूईटी-पीजी 2022** इत्यस्याः परीक्षायाः आयोजनं सुनिश्चितम् अस्ति। **प्रवेशपरीक्षायाम् आवेदनात् प्रागेव सर्वे अभ्यर्थिनः एन.टी.ए.द्वारा प्रकाशित सर्वनिर्देशान् सम्यक्तया अवगच्छेयुः । प्रत्येकं स्तरे आवेदनकाले सावधानं समस्तसूचनाः प्रदेयाः।**

शिक्षाशास्त्रिपाठ्यक्रमे प्रवेशाय समस्तैः अभ्यर्थिभिः एन.टी.ए.द्वारा निर्धारित-सद्यस्क-आवेदनप्रक्रियया आवेदनीयमस्ति । आवेदनोपरान्तम् एन.टी.ए.द्वारा निर्धारितेषु विभिन्नकेन्द्रेषु आवेदकैः सङ्गणकाधारितपरीक्षणस्य (CBT) माध्यमेन परीक्षा सम्पादनीया अस्ति । चयनमापदण्डानाम् अनुरूपेण प्रवेशपरीक्षोत्तीर्णैः छात्रैः पुनः केन्द्रीयसंस्कृतविश्वविद्यालयस्य विभिन्नपरिसरेषु अध्ययनार्थं प्रवेशाय ऑनलाइन-आवेदनं करणीयमस्ति ।

प्रवेशार्थम् आवेदनकाले प्रत्येकं छात्रैः केन्द्रीयसंस्कृतविश्वविद्यालयस्य नवपरिसरेषु प्रवेशार्थम् अधिकाधिक-वरीयताक्रमेण स्वीयविकल्पानाम् उल्लेखः करणीयः अस्ति । एतस्याः वरीयतायाः क्रमेण परिसरेषु प्रवेशः शक्यः । इष्टपरिसरे स्थानस्य अनुपलब्धौ वरीयताक्रमानुसारेण अन्यस्मिन् परिसरे प्रवेशार्हता भविष्यति। विश्वविद्यालये प्रवेशार्थम् अखिलभारतीयस्तरीया वरीयतासूची निर्मातव्या । सफलच्छाणां सूची विश्वविद्यालयस्य जालपुटे उपारोहणीया भविष्यति ।

## 3. शिक्षाशास्त्रिपाठ्यक्रमे उपलब्धस्थानानां संख्या

शिक्षाशास्त्रिपाठ्यक्रमे उपलब्धस्थानानां सङ्ख्या 715 अस्ति । परिसरशः उपलब्धानां कुलस्थानानां सङ्ख्या निम्नलिखितास्ति –

**शिक्षाशास्त्री – अध्ययनकेन्द्रे/परिसरे उपलब्धस्थानानि**

| क्र. | केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरनाम | उपलब्ध-संख्या |
|---|---|---|
| **1.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, कोट-भलवालः, जम्मूः, जम्मूकाश्मीरम्-181122 | **110** |
| **2.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः, विशालखण्डः-4, गोमतीनगरम्, लखनऊ, उत्तरप्रदेशः -226010 | **55** |
| **3.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धिपरिसरः, मेनसे, भारतीनगरम्, श्रृङ्गेरी, कर्णाटकम्- 577 139 | **55** |

| | | |
|---|---|---|
| **4.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, त्रिवेणीनगरम्, गोपालपुरा-बाईपास, जयपुरम्, राजस्थानम्- 302018 | **110** |
| **5.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, चन्दनहजूरीरोड, पुरी, ओडिशा-752001 | **110** |
| **6.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूरपरिसरः, गुरुवायूरः, पुरनाट्टुकरा, त्रिशूरः केरलम् - 680551 | **55** |
| **7.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, संस्कृतमार्गः, बागसेवनिया, भोपालम् , म.प्र.- 462043 | **110** |
| **8.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, बलाहरः, सूही, देहरा, हिमाचलप्रदेशः 177108 | **55** |
| **9.** | केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, सिपाईपारा, लेम्बुचेरा, अगरतला, पश्चिमत्रिपुरा-799210 | **55** |

**4 आरक्षणम्**

भारतसर्वकारस्य नियमानुसारम् आरक्षणव्यवस्था अधोलिखिता वर्तते -

- अनुसूचितजातीयानां कृते — 15%
- अनुसूचितजनजातीयानां कृते — 7.5%
- अन्य-अप्रगतजातीयानां कृते — 27%
- दिव्याङ्गानाम् (अन्यथासक्षमाणां) / प्रज्ञाचक्षुषां कृते — 3%
- युद्धे / सैनिकसंघर्षे सशस्त्रासेनागत-हताहतानां विधवानाम् /अपत्यानाम् कृते — 3%
  (प्रमाणपत्रे हताहतावस्थाविषये स्पष्टोल्लेखः अपेक्षितः अस्ति।)
- राष्ट्रियस्तरस्य क्रीडालूनां कृते — 2%
- आर्थिकरूपेण अक्षमाणां कृते — 10%

**ध्यातव्यम्** - भारतशासनस्य/विश्वविद्यालयानुदानायोगस्य निर्देशानुसारेण आरक्षितछात्राणाम् अनुपलब्धौ सामान्यवर्गीयच्छात्रैः रिक्तस्थानानि वरीयताक्रमेण पूरयिष्यन्ते।

उपर्युक्तकोटीनाम् आवेदकैः परिसरे प्रवेशकाले अर्हतायाः प्रमाणपत्रं राजपत्रिताधिकारिभिः प्रमाणीकृत्य आवेदनेन सह प्रस्तोतव्यम्। अन्यथा प्रवेशार्हता निरस्ता भविष्यति। आरक्षितश्रेण्याः प्रार्थिनामभावे रिक्तस्थानानि सामान्यैः प्रार्थिभिः वरीयताक्रमेण पूरयिष्यन्ते। आरक्षणनिर्धारणं केन्द्रीयस्तरे एव भविष्यति।

**5. आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः**

- अनुसूचितजाति/जनजाति/अन्य-अप्रगतजातीयानां कृते - जिल्लाधीशः/ उपजिल्लाधीशः (एस.डी.एम.)/तहसीलदारः/एम.आर.ओ.।

- दिव्याङ्गानाम् (अन्यथा सक्षमाणां)/प्रज्ञाचक्षुषां कृते राजकीयचिकित्सालयस्य प्रधानचिकित्साधिकारी। 40% विकलाङ्गता ततोऽधिका वा अर्हताऽधिकता)।
- सशस्त्रसेनानीनां बालकानां/विधवानां कृते - सैनिक/नाविक/वायुसेनासंघटनानां सचिवः।

**6 . विश्वविद्यालयस्य परिसरेषु अध्ययनधाराक्रमेण आरक्षितस्थानानि**

- शिक्षाशास्त्रिकक्षायां निर्धारितस्थानानाम् अशीतिप्रतिशतं (80%) परम्परागतधारायाः शास्त्री, आचार्यः, शिरोमणिः, विद्वन्मध्यमा, विद्वदुत्तमा बी.ओ.एल्. (संस्कृतम्) अथवा तत्समकक्षपरम्परागतपरीक्षायाम् उत्तीर्णवतां छात्राणां कृते, विंशतिप्रतिशतम् (20%) आधुनिकधारायाः बी.ए. (त्रिषु वर्षेषु संस्कृतसहितम्) / एम.ए. (संस्कृतम्) अथवा तत्समकक्षपरीक्षोत्तीर्णच्छात्राणां कृते आरक्षितानि सन्ति।
- पारम्परिकधारा - शास्त्री, आचार्यः, शिरोमणिः, विद्वन्मध्यमा, विद्वदुत्तमा तत्समकक्षा परम्पराधारया ।
- आधुनिकधारा - बी.ए. (संस्कृतम्), एम्.ए. (संस्कृतम्) तत्समकक्षा संस्कृतेन सहितम् ।
  (यः छात्रः आधुनिकधारया बी.ए. (संस्कृतम्) समुत्तीर्य तदनन्तरं पारम्परिकधारया आचार्य/तत्समकक्षायां प्रथमवर्षे अधीयानः सोऽपि आधुनिकधारायामेव अन्तर्भवति।)
- निर्धारितप्रवेशस्थानेषु पञ्चाशत्- प्रतिशतं स्थानानि (50%) अखिलभारतीयवरीयतायाः आधारेण अर्हेभ्यः प्रत्याशिभ्यः आरक्षितानि। अवशिष्टानि पञ्चाशत्प्रतिशतं स्थानानि (50%) प्रत्येकं परिसरस्य, तेन सम्बद्धक्षेत्रस्य च प्रत्याशिनां कृते आरक्षितानि सन्ति। एतेषु त्रिंशत् प्रतिशतं (30%) स्थानानि सम्बद्धक्षेत्रे अध्ययनं कृतवतां छात्राणां कृते, अपि च विंशतिप्रतिशतं (20%) स्थानानि तत्क्षेत्रे स्थितात् विश्वविद्यालयपरिसरात् शास्त्रि/आचार्यपरीक्षोत्तीर्णानां प्रत्याशिनां कृते आरक्षितानि।
- केन्द्रीयसंस्कृतविश्वविद्यालयस्य जम्मू-लखनऊ-शृंगेरी-जयपुर-पुरी-त्रिशूर-भोपाल-मुम्बई-अगरतला-बलाहर-देवप्रयागपरिसरेषु नियमितरूपेण अध्ययनं कृत्वा शास्त्रिपरीक्षां समुत्तीर्णवन्तः अथवा तृतीयवर्षे अधीयानाः अपि च आचार्यद्वितीयवर्षे अन्तिमखण्डे अधीयानाः अथवा उत्तीर्णाश्च नियमितच्छात्राः एव परिसरसम्बद्धारक्षणे अन्तर्भवन्ति।
- प्रवेशपरीक्षोत्तीर्णवतां पूर्वोत्तरराज्यानां छात्राणां कृते एकलव्यपरिसरे 50% स्थानानि आरक्षितानि सन्ति। (अवधेयं यत् प्रवेशकाले अवश्यं छात्रेण सम्बद्धसक्षमाधिकारिभिः सत्यापितं निवासस्थानप्रमाणपत्रं प्रस्तोतव्यम्।)
- विश्वविद्यालयपरिसराय आरक्षितेषु स्थानेषु रिक्तेषु सत्सु इमानि स्थानानि प्रवेशार्हैः तत्क्षेत्रीयप्रत्याशिभिः पूरयिष्यन्ते। परिसरसम्बद्धक्षेत्रार्थम् आरक्षितेषु स्थानेषु रिक्तेषु सत्सु तानि अखिलभारतीयवरीयतासूच्यां स्थितैः प्रवेशार्हैः प्रत्याशिभिः पूरयिष्यन्ते।

- क्षेत्रनिर्धारणम् - प्रत्याशिना यस्य परिसरसम्बद्धक्षेत्रस्य विश्वविद्यालयात् मान्यताप्राप्तपरीक्षासंस्थायाः वा शास्त्रि/बी.ए. (संस्कृतेन)/आचार्यः/एम.ए. (संस्कृतेन) परीक्षा उत्तीर्णा भवेत्, सः तस्य एव क्षेत्रस्य प्रत्याशी इति गण्यते।

  (उदाहरणम् - यदि कश्चन छात्रः शास्त्रिपरीक्षोत्तीर्णताधारेण आवेदनं करोति तर्हि तस्य क्षेत्रनिर्धारणम् एवं भवति - शास्त्रिपरीक्षाम्/बी.ए. (संस्कृतम्) परीक्षाम् उत्तरप्रदेशस्य कस्माच्चित् विश्वविद्यालयात् उत्तीर्य जयपुरे आचार्य/एम.ए. प्रथमवर्षे अधीयानस्य छात्रस्य सम्बद्धक्षेत्रम् उत्तरप्रदेश एव भवति, न तु राजस्थानम् ।)

**विशेषः** - धारा/क्षेत्रादिसंबद्धेषु आरक्षितस्थानेषु आवश्यकतानुसारं परिवर्तनस्य अधिकारः विश्वविद्यालयाधीनः स्यात्।

**सम्बद्धक्षेत्रस्य परिगणनम् अन्तिमपरीक्षोत्तीर्णानुगुणमेव भवति।**

**सम्बद्धक्षेत्रे स्थितानां विश्वविद्यालयानां /परीक्षासंस्थानां कृते परिसरसम्बद्धक्षेत्राणि (राज्यानि)**

| क्र. | परिसरस्य नाम | परिसरसम्बद्धक्षेत्राणि (राज्यानि) |
|---|---|---|
| 1. | श्रीरणवीरपरिसरः | जम्मू एवं काश्मीरम्, पञ्जाबः, चण्डीगढम्, लद्दाक |
| 2. | लखनऊपरिसरः | उत्तरप्रदेशः, उत्तराखण्डः |
| 3. | श्रीराजीवगान्धिपरिसरः | कर्नाटकः, तेलङ्गाणा, आन्ध्रप्रदेशः, गोवा, लक्ष्यद्वीपम्, दमनद्वीपसमूहः, |
| 4. | जयपुरपरिसरः | राजस्थानम्, दिल्ली |
| 5. | श्रीसदाशिवपरिसर | ओडिशा, बिहारः |
| 6. | गुरुवायूरपरिसरः, केरलम्, | तमिलनाडुः, पुदुचेरी, अण्डमान-निकोबारः |
| 7. | भोपालपरिसरः | मध्यप्रदेशः, छत्तीसगढः, झारखण्डः, महाराष्ट्रम्, गुजरातः, दादरा-नगरहवेली |
| 8. | वेदव्यासपरिसरः | हिमाचलप्रदेशः, हरियाणा |
| 9. | एकलव्यपरिसरः | त्रिपुरा, प. बंगालः, असमः, मणिपुरम्, नागालैण्ड, सिक्किम, अरुणाचल-प्रदेशः, मेघालयः, मिजोरम् |

## 7. शिक्षाशास्त्रि (बी.एड्.) प्रवेशपरीक्षायै (2022) निर्देशाः

केन्द्रीयसंस्कृतविश्वविद्यालये शिक्षाशास्त्रिकक्षायाम् अध्ययनार्थिभ्यः एन.टी.ए.द्वारा **सीयूईटी-पीजी 2022** इत्यस्याः परीक्षायाः माध्यमेन देशस्य विभिन्नेषु भागेषु निर्धारितकेन्द्रेषु द्विवर्षीयशिक्षाशास्त्रि-(बी.एड्.) पाठ्यक्रमाय प्रवेशपरीक्षा आयोज्यमाना वर्तते । प्रवेशपरीक्षायाः दिनाङ्कस्य समयस्य च घोषणा एन.टी.ए.द्वारा भविष्यति । योग्यतायुतैः छात्रैः प्रवेशपरीक्षार्थम् अधोलिखितजालपुटस्य माध्यमेन नियतावधौ सद्यस्क-आवेदनं कर्तुं शक्यते -

**https://cuet.nta.nic.in/**

**साक्षात् पञ्जीयनार्थम् आवेदनार्थञ्च –**

**https://examinationservices.nic.in/ExamSys22/Registration/Instruction.aspx**

**प्रमुखदिनाङ्काः**

- प्रवेशपरीक्षायै सद्यस्क-आवेदनप्रक्रिया - 19 मई 2022 तः 18 जून् 2022 (11.50 PM पर्यन्तम्)
- पूर्णतया आवेदितावेदनस्य शुल्कसमर्पणम् - 19 जून् 2022
- आवेदितावेदनस्य संशोधनम् - 20 जून् 2022 तः 22 जून् 2022
- परीक्षादिनाङ्कः - यथासमयं एन.टी.ए.द्वारा घोषणा भविष्यति।

अभ्यर्थिनः कृपया आवेदनेन प्रवेशप्रक्रियया च सम्बद्धसमस्तानां महत्त्वपूर्णदिनाङ्कानां विषये एन.टी.ए.द्वारा प्रदीयमानानां सूचनानां विषये जागरुकाः भवेयुः। एतदर्थम् एन.टी.ए.संस्थायाः जालपुटं सततम् अवलोकनीयम्। आवेदन-प्रवेशप्रक्रियाणां विषये एन.टी.ए.संस्थायाः एव एकाधिकारोऽस्ति ।

8. **परीक्षाकेन्द्राणि**

एन.टी.ए.द्वारा निर्धारितेषु परीक्षाकेन्द्रेषु कस्यचित् एकस्य केन्द्रस्य चयनं छात्रैः प्रदत्तसूचनाधारेण भविष्यति । केन्द्रनिर्धारणादीनां सम्बन्धे एन.टी.ए.द्वारा प्रकाशितनियमावल्याः सावधानम् अवलोकनम् आवश्यकम् इति। अभ्यर्थिनः चितकेन्द्रे एव परीक्षार्थम् अर्हाः भविष्यन्ति ।

**9. अत्यावश्यकसूचनाः**

- आवेदनप्रक्रियायाः प्राक् एन.टी.ए.द्वारा प्रकाशितनिर्देशिकायाः, अस्याः निर्देशिकायाश्च परिचयः आवश्यकः अस्ति ।
- सीयूईटी-पीजी इत्यन्तर्गतं सद्यस्क-आवेदनं ध्यानेन करणीयम् । अपूर्णसद्यस्क-आवेदनम् अस्वीकार्यम् इति।
- सद्यस्क-आवेदने लिखितानां तथ्यानां सत्यापनं परीक्षासमये प्रवेशसमये च भविष्यति।
- कस्यचित् तथ्यस्य असत्यत्वे प्रमाणिते सति, यथानियमं न्यायिकदण्डः, परीक्षायाः निष्कासनम्/ प्रवेशनिरस्तीकरणम् इत्यादिकं यथायोग्यं प्रकल्पयिष्यते।
- एन.टी.ए.द्वारा निर्धारितशुल्कं समर्प्य आवेदनप्रक्रिया पूर्णतया सम्पादनीया।

**10. विश्वविद्यालयपरिसरेषु अध्ययनार्थं सद्यस्क-आवेदनाय निर्देशाः**

प्रवेशपरीक्षायाम् उत्तीर्णे सति अभ्यर्थी अध्ययनाय विश्वविद्यालयस्य जालपुटे परिसरचयनं करिष्यति। एतदर्थम् उत्तीर्णाभ्यर्थिनां सूची प्रकाशयिष्यते । उत्तीर्णाभ्यर्थिनः प्रवेशाय सद्यस्क-प्रवेश-आवेदनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य जालपुटे प्रदर्शितनिर्देशानाम् अनुरूपेण कर्तुं शक्नुवन्ति। त्रुटिपूर्ण-अपूर्णानि आवेदनानि, निश्चिततिथ्यनन्तरं समर्पितानि आवेदनानि च अस्वीकार्याणि भविष्यन्ति । शिक्षाशास्त्रिप्रवेशपरीक्षायाम् उत्तीर्णाः छात्राः एव वरीयताक्रमेण शिक्षाशास्त्रिपाठ्यक्रमाय निर्धारितपरिसरेषु प्रवेशार्हाः भविष्यन्ति। इयं वरीयतासूची केवलं वर्षाय 2022 एव मान्या

भविष्यति । प्रवेशोपरान्तस्य स्थानान्तरणस्य अनुमतिः अशक्या । तथा च प्रवेशोपरान्तं शुल्कमपि अप्रत्यर्पणीयम् । निर्देशिकेयं ध्यानेन पठनीया । यदा अपेक्षिताः अर्हताः विद्यन्ते, तदा एतदर्थम् आवेदनीयम् ।

**परिसरप्रवेशार्थम् आवेदनप्रक्रियार्थम् अवधेयाः अंशाः -**

- सद्यस्क-आवेदने नवीनतमदिनाङ्काङ्कितच्छायाचित्रं हस्ताक्षरं च उपरोहणीये ।
- विश्वविद्यालये प्रवेशाय परीक्षार्थिनां सम्बद्धक्षेत्रं (Catchment Area) तदेव यतः शास्त्रि/बी.ए. (संस्कृतम्)/आचार्यः/एम.ए. (संस्कृतम्) परीक्षा उत्तीर्णा कृता।
- विश्वविद्यालयपरिसरस्य कूटाङ्कः विश्वविद्यालयाधीतैः छात्रैः एव पूरणीयः, ये छात्राः विश्वविद्यालयस्य जम्मू-लखनऊ-शृंगेरी-जयपुर-पुरी-त्रिशूर-भोपाल-मुम्बई-बलाहर-अगरतला-देवप्रयागपरिसरेषु नियमितरूपेण शास्त्रितृतीयवर्षोत्तीर्णाः सन्ति, उत् अधीयानाः सन्ति। तथा च ये छात्राः नियमितरूपेण आचार्यद्वितीयवर्षस्य अन्तिमसत्रार्धेषु अध्ययनरताः सन्ति, उत् उत्तीर्णाः सन्ति ।

निर्देशिकेयं सावधानं पठनीया, स्वकीयपात्रतायाः अवबोधनानन्तरमेव अभ्यर्थिना सद्यस्क-आवेदनं करणीयम्।

## 11. सद्यस्क-आवेदनात् प्राक् ध्यातव्यानि तथ्यानि

- केवलमर्हप्रार्थिभिः परीक्षायां सम्मिलितैर्भाव्यम्। यदि कश्चिद् अर्हः नास्ति, परन्तु शिक्षाशास्त्रिप्रवेश-परीक्षायां सम्मिलितो भवति, तर्हि परिणामे सः व्यक्तिगतरूपेण स्वयम् उत्तरदायी भविष्यति।
- शिक्षाशास्त्रिपाठ्यक्रमः एन.सी.टी.ई.द्वारा मान्यताप्राप्तः अस्ति। विश्वविद्यालयस्य विभिन्नपरिसरेषु निर्धारितसंख्यानुसारं योग्यताक्रमानुसारेण एव प्रवेशः प्रकल्पयिष्यते।
- प्रवेशार्हतापरिशीलनम्, क्षेत्रसम्बद्धनिर्णयः आरक्षणादीनां निश्चयश्च, एतत्सर्वं विश्वविद्यालयस्य अधीनं वर्तते।
- प्रवेशविषये विश्वविद्यालयस्य कुलपतेः निर्णय एव अन्तिमः।
- न्यायिकविषयेषु देहली-उच्चन्यायालयस्य एव क्षेत्राधिकारः भविष्यति।
- पुनः मूल्याङ्कनं नैव भविष्यति।

## 12. परीक्षावधिः परीक्षासम्बद्धसूचनाः च

- परीक्षायै एन.टी.ए. इत्यस्याः नियमावली सावधानं पठनीया ।
- परीक्षावधिः होराद्वयम् इति । अयञ्च निर्धारित-स्लोट (Slot) रूपेण निर्धारितो भविष्यति ।
- शिक्षाशास्त्रिप्रवेशपरीक्षायाम् अभ्यर्थी सङ्गणकाधारितपरीक्षणस्य (CBT) माध्यमेन परीक्षां सम्पादयिष्यति । यदि अपेक्ष्यते, सङ्गणकपरिचालनस्य अभ्यासः अवश्यमेव करणीयः ।
- सर्वे प्रश्नाः वैकल्पिकाः भविष्यन्ति।
- प्रवेशपरीक्षासमये परीक्षाकक्षे प्रवेशपत्रम् अनिवार्यतया प्रस्तोतव्यम्।

- शिक्षाशास्त्रिप्रवेशपरीक्षायाम् अवैधसाधनानि अवलम्बयन् उत्तराणि लेखितुम् अन्यतः साहाय्यं प्राप्नुवन् अनुशासनहीनतां वा प्रदर्शयन् परीक्षार्थी केन्द्राध्यक्षेण सद्यः परीक्षाया बहिष्करिष्यते यथाविधि दण्डनं वा करिष्यते।
- छायाचित्रेण सह वैषम्ये सति, सन्देहे जाते, परीक्षातः निलम्बनम्/ प्रवेशात् निलम्बनम्/ विधिवत् दण्डनं वा करिष्यते। तदर्थं छात्रः स्वयम् उत्तरदायी भविष्यति।
- परीक्षाभवने गणकयन्त्रं, चलदूरवाणी, स्मार्ट-घटी चेत्यादिकं सर्वथा वर्जितम्।

**13. प्रश्नपत्ररूपरेखा**

सङ्गणकाधारिता शिक्षाशास्त्रिप्रवेशपरीक्षा बहुविकल्पात्मक-प्रश्नपत्ररूपेण भविष्यति । अस्य पत्रस्य द्वयोः खण्डयोः 100 बहुविकल्पीयाः प्रश्नाः भविष्यन्ति। अस्मिन् प्रश्नपत्रे निम्नलिखितं खण्डद्वयं भविष्यति –

- **खण्डः 'अ' – सामान्यज्ञानं मानसिकयोग्यता च** (25 बहुविकल्पीयाः प्रश्नाः)
- **खण्डः 'ब'**
  - **भागः 1 – संस्कृतभाषादक्षता** (25 बहुविकल्पीयाः प्रश्नाः)
  - **भागः 2 – संस्कृतसाहित्यम्** (25 बहुविकल्पीयाः प्रश्नाः)
  - **भागः 3 – शिक्षणाभिरुचिः** (25 बहुविकल्पीयाः प्रश्नाः)

प्रत्येकं प्रश्नस्य चत्वारि वैकल्पिकानि उत्तराणि भविष्यन्ति, येषु एकमेव सम्यक् उत्तरं भविष्यति। केवलम् एकं सम्यक् उत्तरं चित्वा सङ्गणकपटले प्रविष्टव्यं भविष्यति।

**14. मूल्याङ्कनविधिः**

शिक्षाशास्त्रिपाठ्यक्रमस्य उद्देश्यं प्रशिक्षितसंस्कृतशिक्षकाणां निर्माणम् अस्ति। अतः सम्पूर्णप्रश्नपत्रस्य माध्यमं संस्कृतमेव भविष्यति। अतः शिक्षाशास्त्रिप्रवेशपरीक्षायाम् उत्तीर्णतायै -

- खण्डः 'अ' एवञ्च खण्डः 'ब'- खण्डद्वये कुलप्राप्ताङ्कानां (100 अङ्कानां) समानरूपेण गणनया उत्तीर्णतासूची निर्धारिता भविष्यति।
- प्रवेशपरीक्षायाम् **उत्तीर्णतायै** अभ्यर्थिने 35% न्यूनतमानाम् अङ्कानां प्राप्तिः अनिवार्या भविष्यति।
- शिक्षाशास्त्रिपाठ्यक्रमे **प्रवेशार्थम्** अर्हतायै अभ्यर्थिना प्राप्तप्राप्ताङ्कानां वरीयतायाः अन्यसम्बद्ध-नियमानां चानुरूपेण निर्मिता भविष्यति।

**15. परीक्षापरिणामसम्बद्धाः विशेषसूचनाः**

- प्रवेशपरीक्षापरिणामस्य वरीयतासूचीनिर्माणम् अखिलभारतीयस्तरे भविष्यति।
- विश्वविद्यालयप्रवेशनीतेः अनुसारेण प्रवेशः भविष्यति।

## 16. शिक्षाशास्त्रिप्रवेशपरीक्षायाः (2022) पाठ्यक्रमः

**प्रवेशपरीक्षाकूटसङ्ख्या - PGQP09**

**पाठ्यक्रमः**

**खण्डः 'अ'** (25 बहुविकल्पीयाः प्रश्नाः)

**भागः 1 - सामान्यज्ञानं मानसिकयोग्यता च (General Knowledge & Mental Ability)**

भारतीयसंस्कृतिः, इतिहासः, सङ्गीतम्, क्रीडा, राज्यानि, भारतीयसंविधानम्, संस्कृतसाहित्यम्, साक्षरता, विज्ञानम्, राजधानि, ऐतिहासिकस्थानानि, पुरस्काराः (क्रीडा, साहित्यम्, सैन्यम्, विज्ञानम्), विशिष्टदिनाङ्काः, मानवाधिकाराः, विश्वसम्मेलनानि, संस्कृतसंस्थाः, समसामायिकविषयाः, वर्णमाला-क्रमनिर्धारणम्, संख्या-क्रमनिर्धारणम्, आरोह/अवरोहक्रमः, समयः, वासराः, दिनानि, होराः, दर्पणे समयः/शब्दः, आधारः आधेयश्च।

**खण्डः** [75 बहुविकल्पीयाः प्रश्नाः]

**भागः 1 - संस्कृतभाषादक्षता (Proficiency in Sanskrit Language)** [25 बहुविकल्पीयाः प्रश्नाः]

शब्दरूपाणि, धातुरूपाणि, सन्धिः, **समासः** – अव्ययीभावः, तत्पुरुषः, द्वन्द्वः/द्विगुः, कर्मधारयः/नञ्, बहुव्रीहिः, कारकम् - कर्तृ, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणम्, उपपदविभक्तयः, कृदन्ताः - णिजन्ताः, सन्नन्ताः, तद्धिताः - अपत्यार्थकाः, मतुप्/वतुप्, स्त्रीप्रत्ययाः - टाप्, ङीप्, ङीष्, वाच्यम् - कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम्, वर्तनीगता अशुद्धिः।

**भागः 2 - संस्कृतसाहित्यम् (Sanskrit Literature)** [25 बहुविकल्पीयाः प्रश्नाः]

वैदिकवाङ्मयम्, ब्राह्मणानि, आरण्यकानि, उपनिषदः, वेदान्तः, दर्शनानि, पुराणानि, रामायणम्, महाभारतम्, महाकाव्यानि, कविः, नाटकम्, गद्यम्, पद्यम्, चम्पू, आधुनिकरचनाः रचनाकाराश्च।

**भागः 3 - शिक्षणाभिरुचिः (Teaching Aptitude)** (25 बहुविकल्पीयाः प्रश्नाः)

शिक्षा, उद्देश्यम्, शिक्षकगुणाः, शिक्षणसिद्धान्ताः, अनुशासनम्, शिक्षणाभिवृत्तिः, कक्षाप्रबन्धनम्, शिक्षकभूमिका, शिक्षणोद्देश्यानि, प्राचीनशिक्षा, शिक्षामनोविज्ञानम्, शिक्षेतिहासः, शिक्षादर्शनम्, शिक्षासमाजशास्त्रम्, समावेशितशिक्षा, राष्ट्रियशिक्षानीतयः (1968, 1986, 2020)।

## 17. प्रवेशपरीक्षायाः प्रश्नानाम् उदाहरणानि

**PART-A**

**Section 1 - सामान्यज्ञानं मानसिकयोग्यता च**

1. योगदिवसः आयोज्यते ?
   1. 21 मई
   2. 22 मई
   3. 21 जून्
   4. 22 जून्

   **उत्तरम् - 21 जून्**

2. AI, BJ, CK, ?

| | | | |
|---|---|---|---|
| 1. | EM | 2. | DM |
| 3. | EL | 4. | DL |

**उत्तरम् - DL**

## PART B

## SECTION - 1 संस्कृतभाषादक्षता

3. ‘विद्यावान्’ अस्मिन् पदे अयं प्रत्ययः अस्ति -

| | | | |
|---|---|---|---|
| 1. | वतुप् | 3. | ड्मतुप् |
| 3. | मतुप् | 4. | वति |

**उत्तरम् - वतुप्**

4. ‘द्वित्राः’ अत्र समासः अस्ति -

| | | | |
|---|---|---|---|
| 1. | बहुव्रीहिः | 3. | तत्पुरुषः |
| 3. | द्विगुः | 4. | द्वन्द्वः |

**उत्तरम् - बहुव्रीहिः**

## SECTION - 2 संस्कृतसाहित्यम्

5. अनुबन्धचतुष्टये नान्तर्भवति -

| | | | |
|---|---|---|---|
| 1. | विषयः | 3. | अधिकारी |
| 3. | प्रयोजनम् | 4. | उपदेष्टा |

**उत्तरम् - उपदेष्टा**

6. ‘माता भूमिः पुत्रोऽहं पृथिव्याः’ सूक्तिरियं कस्मिन् वेदे उपलभ्यते?

| | | | |
|---|---|---|---|
| 1. | ऋग्वेदे | 3. | यजुर्वेदे |
| 3. | सामवेदे | 4. | अथर्ववेदे |

**उत्तरम् – अथर्ववेदे**

## SECTION – 3 – शिक्षणाभिरुचिः

7 राष्ट्रियशिक्षानीतिः 2020 प्रकाशिता -

| | | | |
|---|---|---|---|
| 1. | 30 मार्च् | 2. | 29 जुलै |
| 3. | 30 अप्रेल् | 4. | 20 जून् |

**उत्तरम् - 29 जुलै**

8. शिक्षणं कदा पूर्णं भवति ?

| | | | |
|---|---|---|---|
| 1. | यदा पाठः समाप्यते। | 3. | यदा कालांशः समाप्यते। |
| 3. | यदा छात्रस्य अधिगमः भवति। | 4. | यदा शिक्षकः शिक्षणसमाप्तिं घोषयति। |

**उत्तरम् - यदा छात्रस्य अधिगमः भवति।**